# ज

जकारो व्यञ्जनवर्णभेदः स्पर्शसंज्ञस्तस्योच्चारणस्थानं तालु, आभ्यन्तरप्रयत्नः जिह्वामध्यभागेन तालुस्पर्शः बाह्यप्रयत्नाश्च घोषसंवारनादाः अल्पप्राणश्च। मातृकान्यासेऽस्य वाममणिबन्धे न्यासः। तन्त्रोक्ता अस्य वाचकशब्दा यथा "जश्चतुराननः शूली भोगी च विजया स्थिरा। बलदेवो जयो जेता धातकी सुमुखी विभुः। लम्बोदरी स्मृतिः शाखा सुप्रभा कर्त्तृकाधरा। दीर्घबाहुस्त्रिचिह्नेशो नन्दी तेजाः सुराधिपः। जवनो वेगितो वाममणिबन्धपदात्मकः। कृष्णाकृतेश्वरो वेशी चामोदी मदविह्वलः" वर्णोद्धारतन्त्रम्। अस्य ध्येयरूपं यथा "जकारं परमेशानि! या स्वयं मध्यकुण्डली। शरच्चन्द्रप्रतीकाशं सदा त्रिगुणसंयुतम्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये!" कामधेनुतन्त्रम्। काव्येऽस्य प्रथमविन्यासफलं वृत्त० र० टी० उक्तं "जोसिवलाभमित्यादि"।

**ज** पु० जि–जन–जु–वा ड। १मृत्युञ्जये २जन्मनि ३पितरि ४जनार्द्दने त्रि० मेदि० ५विषे ६मुक्तौ ७तेजसि ८पिशाचे च। शब्दरत्ना०। ९वेगे एकाक्षरकोषः "जो गुरुमध्यगतः" इत्युक्ते गुरुमध्ये प्रान्तयोर्लघुद्वययुक्ते छन्दःशास्त्रप्रसिद्धे (।ऽ।) त्रिवर्णे १० गणे तस्य काव्यप्रथमविन्यासे। "भुजगोरुज जं" इत्युक्तेः रोगःफलम् सर्पोऽस्य देवः" ११जाते त्रि० "प्रावृट्शरत्कालदिवां जे" पा० अलुक् स०। प्रावृषिजः शरदिजः कालेजः दिविजः। "विभाषा वर्षक्षरशरेत्यादि" पा०। वर्षेज वर्षज इत्यादि। "तत्पुरुषे कृति बहुलम्" पा०। मनसिजः मनोजः सरसिजं सरोजमित्यादि। जरायुजः अण्डजः स्वेदजः उद्भिज्जः"। १२वेगिते १३जेतरि त्रि०शब्दरत्ना०। [कुपुष्पे न०मेदि०।

**जकुट** पु० जं जातं कुटति कुट–क। १मलयाचले २वार्त्ता-

**जक्ष** भक्षे सक० हासे अक० जक्षा० स्वपादि० प० सेट्। स्वपादिश्च रुदाद्यन्तर्गणस्तेन भलादेः सार्वधातुकस्य इट्। जक्षिति जक्षितः अभ्यस्तसंज्ञः तेन जक्षति। अजक्षीत् "उतैव स्त्रीभिः सह मोदमानो जक्षदुत वापि भयानि पश्यन्" शत०ब्रा० १४।७।१।१४। "अन्नत्यां कश्चिदन्नाति जक्षत्यां सह जक्षिति" भाग० ४।२५।५७। "हविर्जक्षिति निःशङ्कोमखेषु मघवानसौ" जक्षिमोऽनपराधेऽपि" भट्टिः। अस्यान्तःस्थादितां केचित् मन्यन्ते। "यक्षतामिति येऽप्युक्तास्ते वै यक्षास्तु यक्षणात्" विष्णुपु० यक्षनामनिरुक्तौ तथादर्शनात्।

**जक्ष** दाने भ्वा० इदित् आ०सक०सेट्। इदित्करणसामर्थ्यात् अनुपधस्यापि नुम्। जङ्क्षते अजङ्क्षिष्ट। मित्। अजङ्क्षि अजाङ्क्षि (जा) जङ्क्षम्। इदित्करणात् जङ्क्ष्यते।

**जक्षण** न० जक्ष–भावे ल्युट्। भक्षणे हेमच०।

**जगच्चक्षुस्** पु० जगतां चक्षुरिव प्रकाशकत्वात्। सूर्य्ये हेमच०

**जक्षादि** पु० "जक्ष जागृ दरिद्रा च चकासृः शास्तिरेव च। दीधी वेवी च विज्ञेयो जक्षादिः पञ्चकोगणः" इत्युक्ते अभ्यस्तसंज्ञे धातुपञ्चके "नाभ्यस्ताच्छतुः" पा० जक्षत् जाग्रत् इत्यादि।

**जगत्** पु०गम–क्विप् नि०द्वित्वम् तुक् च। १वायौ २जङ्गमे त्रि० मेदि०। ३विश्वे न० अमरः। ४लोके सचराचरे प्रपञ्चभूते भोगोपयोगिपरिकरसहिते मायामये संसारचक्रे यथोक्तमभियुक्तैः "न निरूपयितुं शक्या विस्पष्टं भासते च या। सा मायेतीन्द्रजालादौ लोकाः संप्रतिपेदिरे। स्पष्टं यथा जगच्चेदमशक्यं तन्निरूपणम्। मायामयं जगत् भाति वीक्षस्वापक्षपाततः"।"जगद्योनिरयोनिस्त्वं जगदन्तोनिरन्तकः। जगदादिरनादिस्त्वं जगदीशोनिरीश्वरः" कुमा०। "जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ" रघुः। "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्"मनुः। लोके "जगत्यपर्य्याप्तसहस्रभानुना" "युगान्तकालप्रतिसंहृतात्मनोजगन्ति यस्यां सविकाशमासत"माघः। जङ्गमे "जगतां तस्थुषश्च" सन्ध्यामन्त्रः। क्विबन्तत्वात् जगत् जगती इत्यादिरूपम् "दृषन्महद्बृहज्जगच्छतृवच्च" पा० निपातनपक्षे जगत् जगन्तौ इत्यादिरूपमिति केचिदाहुस्तच्चिन्त्यम् तस्य शतृतुल्यत्वेऽपि "नाभ्यस्ताच्छतुरिति" पा० निषेधात् न नुम्। शतृतुल्यत्वप्रयोजनं तु स्त्रियां ङीप् जगती [हेमच०।

**जगत्कर्त्तृ** पु० ६त०। १ईश्वरे तदभेदात् २चतुर्मुखादौ

**जगच्छन्द** पु० जगती छन्दोऽस्य वेदे नि० पुंवद्भावः। जगत्या छन्दसा तुल्ये। "त्वरोऽसि गयोऽसि जगच्छन्दाः" ता० ब्रा० १।५।१५।

**जगत्पति** पु० ६त०। १परमेश्वरे तदभेदात् २हरिहरादौ "यदा च तस्याधिगमे जगत्पतेः" कुमा० जगदीशादयोऽप्यत्र। "जगदीशो निरीश्वरः" कुमा०